॥ दीपावली / लक्ष्मी / बही पूजन पद्धति ॥

॥ अनुक्रमाणिका ॥

❖ **शब्द उत्पत्ति** दीपावली शब्द की उत्पत्ति संस्कृत के दो शब्दों **'दीप'** अर्थात 'दिया' व **'आवली'** अर्थात 'लाइन' या 'श्रृंखला' के मिश्रण से हुई है।

॥ दीपावली महत्व ॥

❖ **शुभ दीपावली पांच दिन मनायी जाती है**

1. **धनतेरस** के दिन धनवंतरी देवता के पूजन का विधान होता है, हिन्दू मान्यता के अनुसार इस दिन टूटे फूटे बर्तन बदलने और नए बर्तन खरीदने का विधान है। इस दिन लोग चांदी, सोना, प्लेटिनम, रत्न आदि खरीदते है।
2. **रूपचौदस / नरक चतुर्दशी / छोटी दीवाली** के रूप में दूसरे दिन ब्रह्म मुहूर्त में जाग कर स्नान करने का महत्त्व होता है। महिलाये इसदिन सोलह श्रृंगार करती है, मेहंदी आदि लगाकर अपने आप में उत्साहित होती है।
3. **अमावस्या** तीसरे दिन माता महालक्ष्मी जी का पूजन रात्रि काल में महत्वपूर्ण होता है। इस दिन माता का पूजन करके अपनी साडी धन, संपत्ति माता को सौप देते है। तेल के दीपक और घी के दीपक जलाकर माता को प्रसन्न करते है। उत्साह वश फटाखे आदि फोड़ते है। एक दूसरे को बधाईयां देते है, और शुभता कि कामनाये करते है।
4. **माता अन्नपूर्णा** चौथे दिन आकूत का पूजन और गोवर्धन पूजन करते है ताकि सदा अन्न का भण्डार भरा रहे। कुछ लोग इसदिन चिरैयागौर का पूजन मौन रहकर भी करते है।
5. **भाई-दूज** पांचवे दिन भाई - बहनो का पवित्र पर्व मानते है

❖ **महालक्ष्मी बीज मंत्र** — **ॐ श्री श्री महालक्ष्म्यै नमः ॥**

❖ **ललिता त्रिपुर सुंदरी बीज मंत्र** — **ॐ श्री श्री ललिता महा त्रिपुर सुन्दर्य श्री महालक्ष्म्यै नमः ॥**

❖ **महालक्ष्मी महा मंत्र** — **ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद**
श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः ॥

❖ **महालक्ष्मी गायत्री मंक्ष** — **ॐ महालक्ष्म्यै च विद्महे विष्णुपत्न्यै च धीमहि**
तन्नो लक्ष्मी प्रचोदयात ॥

❖ **महालक्ष्मी पूरोणोक्त मंत्र** — **ॐ या देवी सर्वभूतेषु लक्ष्मी रुपेण संस्थिता।**
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

❖ **धन समृद्धि हेतु वशीकरण मंत्र** — **ॐ नमो पद्मावती पद्मनये लक्ष्मी दायिनी वांक्षाभूत प्रेत विंध्यवासिनी सर्व शत्रु संहारिणी दुर्जन मोहिनी ऋद्धि-सिद्धि वृद्धि कुरु कुरु स्वाहा।**
- **ॐ क्लीं श्रीं पद्मावत्यै नमः।**

❖ **धनतेरस और दीपावली में दीप दान मंत्र** — **मृत्युना पाशदण्डाभ्याम् कालेन श्यामया सह।**
त्रयोदश्यां दीपदानात् सूर्यजः प्रीयतां मम ॥

॥ पूजन प्रारम्भ ॥

❖ **पवित्रकरणम्**

ॐ अपवित्र: पवित्रो वा सर्वावस्थां गतोपि वा।
य: स्मरेत् पुण्डरीकाक्षं स: वाह्याभंतर: शुचि: ॥

❖ **आचम्य**

ॐ केशवाय नमः। ॐ माधवाय नमः। ॐ नारायणाय नमः।
ॐ हृषीकेशाय नमः हाथ धो लें

❖ **आसन शुद्धि**

ॐ पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता।
त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥

❖ **पवित्री (पैंती) धारणम्**

ॐ पवित्रे स्त्थो वैष्णव्यौ सवितुर्व: प्रसवऽउत्त्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्र पूतस्य यत्त्काम: पूनेतच्छकेयम्॥

❖ **यज्ञोपवित -**

ॐ यज्ञोपवीतं परमं पवित्रं प्रजा पतेर्यत सहजं पुरुस्तात।
आयुष्यं मग्रंय प्रतिमुन्च शुभ्रं यज्ञोपवितम बलमस्तु तेजः ॥

❖ **शिखाबन्धन-**

ॐ चिद्रूपिणि महामाये दिव्यतेजः समन्विते।
तिष्ठ देवि शिखामध्ये तेजोवृद्धि कुरुव मे॥

❖ **तिलक / चन्दन**

चन्दनस्य महत्पुण्यम् पवित्रं पापनाशनम्।
आपदां हरते नित्यम् लक्ष्मी तिष्ठ सर्वदा॥

- ॐ आदित्या वसो रुद्रा विश्वेदेवा मरुद्गणाः।
तिलकन्ते प्रयच्छन्तु धर्मकामार्थसिद्धये॥

❖ **रक्षाबन्धनम्**

येन बद्धो बलि राजा, दानवेन्द्रो महाबल:।
तेन त्वाम् प्रतिबद्धनामि रक्षे माचल माचल:॥

- ॐ व्रतेन दीक्षामाप्नोति, दीक्षयाऽऽप्नोति दक्षिणाम्।
दक्षिणा श्रद्धामाप्नोति, श्रद्धया सत्यमाप्यते॥

❖ **स्वस्ति-वाचन**

ॐ आ नो भद्राः क्रतवो यन्तु विश्वतोऽ दब्धासो अपरीतास उद्भिदः।
देवा नो यथा सदमिद् वृधे असन्नप्रायुवो रक्षितारो दिवे दिवे॥१॥

- देवानां भद्रा सुमतिर्ऋ जूयतान्देवाना ७ राति रभिनो निवर्तताम्।
देवाना ७ सख्यमुपसेदिमा वयन्देवान आयुः प्रतिरन्तु जीवसे॥२॥
- तान्पूर्वया निविदा हूमहेवयम् भगम् मित्रमदितिन् दक्षमस्त्रिधम्।
अर्यमणं वरुण ७ सोम मश्विना सरस्वती नः सुभगा मयस्करत्॥३॥

- तन्नो वातो मयो भुवातु भेषजन् तन्माता पृथिवी तत्पिता द्यौः ।
  तद् ग्रावाणः सोमसुतो मयो भुवस्तदश्विना शृणुतन् धिष्ण्या युवम् ॥४॥
- तमीशानन् जगतस् तस्थुषस्पतिन् धियञ्जिन्वमवसे हूमहे वयम् ।
  पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ॥५॥
- स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्वेवेदाः ।
  स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥६॥
- पृषदश्वा मरुतः पृश्निमातरः शुभं य्यावानो विदथेषु जग्मयः ।
  अग्निजिह्वा मनवः सूरचक्षसो विश्वेनो देवा अवसा गमन्निह ॥७॥
- भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्ये माक्षभिर्यजत्राः ।
  स्थिरै रङ्गैस्तुष्टुवा ७ सस्तनूभिर् व्यशेमहि देवहितं यदायुः॥८॥
- शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसन् तनूनाम् ।
  पुत्रासो यत्र पितरो भवन्ति मानो मध्यारी रिषतायुर्गन्तोः ॥९॥
- अदितिर्द्यौ रदितिरन्त रिक्षमदितिर् माता सपिता सपुत्रः ।
  विश्वे देवा अदितिः पञ्चजना अदितिर् जातमदितिर् जनित्वम् ॥१०॥
- द्यौः शान्तिरन्तरिक्ष ७ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः
  शान्तिः। वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्व ७
  शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥११॥
- यतो यतः समीहसे ततो नो अभयं कुरु ।
  शन्नः कुरु प्रजाभ्योऽभयन्नः पशुभ्यः ॥१२॥

ॐ श्रीमन महागणाधीपतये नमः, इष्ट देवताभ्यो नमः, कुल देवताभ्यो नमः, ग्राम देवताभ्यो नमः, स्थान देवताभ्यो नमः, वास्तु देवताभ्यो नमः, वाणी हिरण्यगर्भाभ्याम नमः, लक्ष्मी नारायणाभ्याम नमः, उमा महेश्वराभ्याम नमः, शची पुरंदाराभ्याम नमः, मातृ पितृ चरण कमलेभ्यो नमः, सर्वेभ्यो देवेभ्यो नमः, सर्वेभ्यो ब्राह्मणेभ्यो नमः, एतत कर्म प्रधान देवताभ्यो नमः ।

- सुमुखश्चै एकदंतश्च कपिलो गजकर्णक: ।
  लम्बोदरश्च विकटो विघ्ननाशो विनायक: ॥
- धुम्रकेतुर् गणाध्यक्षो भालचन्द्रो गजानन: ।
  द्वादशैतानि नामानि य: पठेच्छृणुयादपि ॥
- विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ।
  संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥
- शुक्लाम्बरधरम देवं शशि वर्णं चतुर्भुजम ।
  प्रसन्नवदनं ध्यायेत सर्व विघ्नोपशान्तये ॥

- अभीप्सितार्थ सिद्ध्यर्थं पूजितो यः सुरासुरैः।
  सर्वविघ्नहरस्तस्मै गणाधिपतये नमः॥
- सर्वमंगलमांगल्ये शिवे सर्वार्थ साधिके।
  शरण्ये त्र्यम्बके गौरी नारायणी नमोस्तु ते॥
- सर्वदा सर्व कार्येषु नास्ति तेषाममंगलम।
  येषां हृदयस्थो भगवान मंगलायतनो हरीः॥
- तदेव लग्नं सुदिनं तदेव ताराबलं चंद्रबलं तदेव।
  विद्याबलं दैवबलम तदेव लक्ष्मीपते तेन्घ्री युगं स्मरामि॥
- वक्रतुंड महाकाय सूर्य कोटि समप्रभ।
  निर्विघ्नं कुरुमे देव सर्व कार्येषु सर्वदा॥

❖ **संकल्प**

ॐ विष्णुर्विष्णुर्विष्णुः, ॐ श्रीमद् भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य ब्रह्मणोऽह्नि द्वितीये परार्धे श्री श्वेतवाराहकल्पे वैवस्वत मन्वन्तरे, अष्टाविंशतितमे युगे कलियुगे, कलिप्रथमचरणे भारतवर्षे जम्बुद्वीपे भरतखण्डे आर्यावर्तान्तर्गत ब्रह्मवर्तैकदेशे अमुकक्षेत्रे, अमुकदेशे, अमुकनाम्नि नगरे, बौद्धावतारे अमुक शके, अमुकायने, अमुक नाम संवत्सरे, दक्षिणायने, मासानां मासोत्तमे मासे कार्तिक मासे, कृष्ण पक्षे, अमावस्यां तिथौ, अमुक वासरे, अमुक नक्षत्रे, यथा राशि स्थिते सूर्ये, यथा यथा राशि स्थितेषु शेषेषु ग्रहेषु सत्सु यथा लग्न, मुहूर्त, योग, करणान्वितायाम् एवं ग्रह गुण विशेषण विशिष्टायां शुभ पुण्य पर्वणि श्रुति-स्मृति-पूराणोक्तफल प्राप्तिकामः अमुक गोत्रः, अमुक नामाहम्, मम सकुटुम्बस्य सपरिवारस्य लोककल्याण आत्मकल्याणाय, भविष्य उज्जवल कामनापूर्तये दीर्घ-आयु-आरोग्य पुत्र-पौत्र-धन-धान्यादि समृद्ध्यर्थे, वर्तमाने अस्मिन व्यापारे शुभपूर्वक चतुर्विध लक्ष्मी वृध्यर्थम् आगतानां संरक्षणार्थम् च गौरी-गणपति, नवग्रह, कुलदेवतानां पूजन पूर्वकं श्रीमहाकाली, महालक्ष्मी, महासरस्वती आदि देवी देवतानां च प्रसन्नार्थं लक्ष्मी पूजनं करिष्ये।

❖ **पृथ्वी ध्यानम्**

ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता।
त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥

- ॐ मही द्यौः पृथिवी च न इमं यज्ञ मिमिक्षताम्। पिपृतान्नो भरीमभिः॥

❖ **रक्षा विधानम्**

अप सर्पन्तु ते भूता ये भूता भूमि संस्थिता: ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥

- अपक्रामन्तु भूतानि पिशाचा: सर्वतो दिशम् ।
सर्वेषाम विरोधेन पूजा कर्म समारभे ॥
- यदत्र संस्थितं भूतं स्थान माश्रित्य सर्वत: ।
स्थानं त्यक्त्वा तु तत्सर्व यत्रस्थं तत्र गच्छतु ॥
- भूत प्रेत पिशाचाद्या अपक्रामन्तु राक्षसा: ।
स्थानादस्माद् ब्रजन्त्यन्यत्स्वी करोमि भुवं त्विमाम् ॥
- भूतानि राक्षसा वापि येत्र तिष्ठन्ति केचन ।
ते सर्व प्यपगच्छन्तु देव पूजां करोम्यहम् ॥

❖ **दिप स्थापनम्**

शुभं करोतु कल्याणं आरोग्यं सुख सम्पदाम् ।
मम बुद्धि विकाशाय दीपज्योतिर्नमोस्तुते ॥

- दीपज्योति: परब्रह्म: दीपज्योति: जनार्दन:।
दीपोहरतिमे पापं दीपज्योतिर् नामोस्तुते ॥

❖ **सूर्य नमस्कार**

ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतम्मर्त्यञ्च ।
हिरण्येन सविता रथेना देवो याति भुवनानि पश्यन् ॥

❖ **शंख पूजनम्**

ॐ पांचजन्याय विद्महे पावमानाय धीमहि । तन्नो शंख: प्रचोदयात् ॥

- त्वं पुरा सागरोत्पन्नो विष्णुना विधृत: करें ।
निर्मित: सर्वदेवैश्च पाञ्चजन्य नमोस्तुते ॥

❖ **घंटी पूजनम्**

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ।
घण्टा नाद प्रकुर्वीत पश्चात् घण्टां प्रपूजयेत ॥

❖ **कलश ध्यान**

ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भि: ।
अहेडमानो वरुणेह बोध्युरुश ७ समा न आयु: प्र मोषी:॥

- कलशस्य मुखे विष्णु: कंठे रुद्र समाश्रिता: ।
मूले त्वस्य स्थितो ब्रह्मा मध्ये मात्र गणा: स्मृता: ॥
- कुक्षौ तु सागरा सर्वे सप्तद्विपा वसुंधरा ।
ऋग्वेदो यजुर्वेद: सामवेदो ह्यथर्वणा: ॥
- अंगैश्च सहिता सर्वे कलशन्तु समाश्रिता:।
अत्र गायत्री सावित्री शान्ति: पुष्टिकरी तथा ॥

- **आयान्तु देवपूजार्थं दुरितक्षयकारका:, गंगे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिन्धुकावेरि जलेऽस्मिन संनिधिं कुरु ॥**
- अस्मिन कलशे वरुणं सांड्ग सपरिवारं सायुधं सशक्तिकमावाहयामि। ॐ भूभुर्व: स्व: भो वरुण ! इहागच्छ इह तिष्ठ स्थापयामि, पूजयामि मम पूजां गृहाण, ॐ अपां पतये वरुणाय नम:
- कलश चतुर्दिक्षु चतुर्वेदान्पूजयेत् (कलश के चारो तरफ कुंकुम एवं चावल लगा दें)
- **पूर्व ऋग्वेदाय नम: ।**
- **दक्षिण यजुर्वेदाय नम: ।**
- **पश्चिम सामवेदाय नम: ।**
- **उत्तर अथर्वेदाय नम: ।**
- **कलश के ऊपर ॐ अपाम्पतये वरुणाय नम: ।**

❖ गणेश ध्यानम्

ॐ गणानां त्वा गणपति ७ हवामहे, प्रियाणान्त्वा प्रियपति ७ हवामहे, निधीनान्त्वा निधिपति ७ हवामहे, वसो: मम आहमजानि गर्भधम् मात्वमजासि गर्भधम् ॥

- **विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय । नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते ॥**
- **वक्रतुण्ड महाकाय सूर्य कोटी समप्रभा**
  निर्विघ्नं कुरु मे देव सर्व-कार्येशु सर्वदा ॥
  ॐ भूर्भुव: स्व: सिद्धि बुद्धि सहिताय गणपतये नम: । गणपतिम् आ. स्था. पूजयामि ।

❖ गौरी ध्यानम्

ॐ हेमद्रितनायां देवीं वरदां शंकरप्रियां ।
लम्बोदरस्य जननीं गौरीं आवाह्याम्यहम् ॥

- **ॐ अम्बे अम्बिके अम्बालिके नमानयति कश्चन ।**
  ससत्स्यश्वक: सुभद्रिकां काम्पीलवासिनीम् ॥
  ॐ भूर्भुव: स्व: गौर्यै नम: । गौरीम् आवाहयामि स्थापयामि पूजयामि ।

॥ षोडश मातृका पूजनम् ॥

ॐ आत्मनःकुल-देवतायै नमः १७	ॐ लोकमातृभ्यो नमः १३	ॐ देवसायै नमः ९	ॐ मेधायै नमः ५
ॐ तुष्ट्यै नमः १६	ॐ मातृभ्यो नमः १२	ॐ जयायै नमः ८	ॐ शच्यै नमः १२
ॐ पुष्ट्यै नमः १५	ॐ स्वाहायै नमः ११	ॐ विजयायै नमः ७	ॐ पद्मायै नमः ३
ॐ धृत्यै नमः १४	ॐ स्वधायै नमः ११	ॐ सावित्र्यै नमः ७	ॐ गौर्य्यै नमः २ ॐ गणेशाय नमः १

ॐ अम्बे अम्बिके अम्बालिके नमानयति कश्चन ।
ससत्स्यश्वकः सुभद्रिकां काम्पीलवासिनीं ॥
गौरी पद्मा शची मेधा, सावित्री विजया जया ।
देवसेना स्वधा स्वाहा, मातरो लोकमातरः ॥
धृतिः पुष्टिस्तथा तुष्टिः, आत्मनः कुलदेवता ।
गणेशेनाधिका ह्येता, वृद्धौ पूज्याश्च षोडश ॥

1. **गणेश गौरी**
2. **पद्मा**
3. **शची**
4. **मेधा**
5. **सावित्री**
6. **विजया**
7. **जया**
8. **देव सेना**
9. **स्वधा**
10. **स्वाहा**
11. **मातरः**
12. **लोकमातरः**
13. **धृतिः**
14. **पुष्टिः**
15. **तुष्टिः**
16. **आत्मनः कुलदेवत**

1. **गणेशम्**

ॐ गणानांत्वा गणपति ७ हवामहे, प्रियाणां त्वा प्रियपति ७ हवामहे, निधीनां त्वा निधिपति ७ हवामहे। वसो: मम आहमजानि गर्भधम् त्वमजासि गर्भधम् ॥

- **ॐ समिपेमातृवर्गस्य सर्वविघ्न हरंसदा।**
त्रैलोक्य पूजितं देवं गणेशं स्थापयाम्यहम् ॥ ॐ गणपतये नमः। आ. स्था. पू.।

1. **गौरीम्**

ॐ आयं गौः पृश्रीरक्रमीदसदन् मातरं पुरः। पितरं च प्रयन्त्स्वः ॥

- **हिमाद्रि तनयां देविं वरदां दिव्य शंकरप्रियाम्।**
लंबोदरस्य जननीं गौरिं आवाहयाम्यहम् ॥ ॐ गोर्यै नमः। आ. स्था. पू.।

2. **पद्माम्**

ॐ हिरण्यरूपा उषयो विरोक उभाविन्द्रा उदिथः सूर्यश्च। अरोहतं वरुण मित्र गर्तं ततश्चक्षाथामदितिं दितिञ्च मित्रोसिवरुणोसि ॥

- **सुवर्णांभांपद्महस्तांविष्णो र्वक्षस्थल स्थितां।**
त्र्यैलोक्य पूजितां देविं पद्मां आवाहयाम्यहम् ॥ ॐ पद्मायै नमः। आ. स्था. पू.।

3. **शचीम्**

ॐ निवेशनः संगमनो वसूनां विश्वा रुपाभिचष्टे शचीभिः। देव इव सविता सत्यधर्म्मेन्द्रो न तस्त्थौ समरे पथीनाम् ॥

- **दिव्यरुपां विशालाक्षीं शुचिं कुंडल धारिणीम्।**
रक्त मुक्ता द्यलंकारां शचि मावाहयाम्यहम् ॥ ॐ शच्यै नमः। आ. स्था. पू.।

4. **मेधाम्**

ॐ मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥

- विश्वेस्मिन् भूरिवरदां जरां निर्जर सेविताम् ।
  बुध्दि प्रबोधिनीं सौम्यां मेधामावाहयाम्यहम् ॥ ॐ मेधायै नमः । आ. स्था. पू. ।

5. **सावित्रीम्**

ॐ सविता त्वा सवाना ७ सुवतामग्निर्गृहपतीना ७ सोमो वनस्पतीनाम् ।
बृहस्पतिर्वाच इन्द्रो ज्यैष्ठ्याय रुद्रः पशुभ्यो मित्रः सत्यो वरुणो धर्मपतीनाम् ॥

- जगत्सृष्टिकरीं धात्रीं देवीं प्रणव मातृकाम् ।
  वेदगर्भां यज्ञमयीं सावित्रिं स्थामयाम्यहम् ॥ ॐ सावित्र्यै नमः । आ. स्था. पू.।

6. **विजयाम्**

ॐ विज्यन्धनुः कपर्दिनो विशल्यो बाणवाँ २ ऽउत ।
अनेशन्नस्य या ऽइषव ऽआभुरस्य निषङ्गधिः ॥

- सर्वास्त्र धारिणीं देवीं सर्वाभरण भूषिताम् ।
  सर्वदेव स्तुतां वन्द्या विजयां स्थापयाम्यहम् ॥ ॐ विजयायै नमः । आ. स्था. पू.।

7. **जयाम्**

ॐ बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य ।
इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥

- दैत्यरक्षःक्षय करीं देवानामभयप्रदां ।
  गीर्वाण वंदिता देवीं जया मावाहयाम्यहम् ॥ ॐ जयायै नमः । आ. स्था. पू. ।

8. **देवसेनाम्**

ॐ इन्द्र आसान्नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।
देवसेना नामभि भञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥

- मयूर वाहनां देवीं खड्ग शक्ति धनुर्धराम ।
  आवाहयेद् देवसेनां तारकासुरमर्दिनीम् ॥ ॐ देवसेनायै नमः । आ. स्था. पू.।

9. **स्वधाम्**

ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः, पितामहेभ्यः स्वधायिभ्यः स्वधा नमः, प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः। अक्षन् पितरोऽ मीमदन्त, पितरोती तृपन्त पितरः, पितरः शुन्धध्वम् ॥

- अग्रजा सर्वदेवानां कव्यार्थं प्रतिष्ठिता ।
  पितृणां तृप्तिदां देवीं स्वधा मावाहयाम्यहम् ॥ ॐ स्वधायै नमः । आ. स्था. पू. ।

10. **स्वाहाम्**

ॐ स्वाहा प्राणेभ्यः साधिपतिकेभ्यः। पृथिव्यै स्वाहाग्नये स्वाहान्तरिक्षाय स्वाहा वायवे स्वाहा । दिवे स्वाहा सूर्याय स्वाहा ॥

- हविर्गृहित्वा सततं देवेभ्यो या प्रयच्छति ।
  तां दिव्यरुपां वरदां स्वाहा मावाहयाम्यहम् ॥ ॐ स्वाहायै नमः । आ. स्था. पू. ।

11. मातृ

ॐ आपो अस्मान् मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु।
विश्व ७ हि रिप्रं प्रवहन्ति देवीरुदिदाभ्य: शुचिरा पूतएमि।
दीक्षातपसोस्तनूरसि तां त्वा शिवा ७ शग्मां परिदधे भद्रं वर्णम पुष्यन ॥

- आवाहयाम्यहं मातृः सकला लोक पूजिताः।
  सर्वकल्याण रूपिण्यो वरदा दिव्य भूषिताः ॥ ॐ मातृभ्यो नमः। आ. स्था. पू.।

12. लोकमातृ

ॐ रयिश्चमे रायश्चमे पुष्टंचमे पुष्टिश्चमे विभुचमे प्रभुचमे पूर्णंचमे पूर्णतरंचमे
कुयवंचमे क्षितंचमे न्नंचमे क्षुच्चमे यज्ञेनकल्पन्ताम् ॥

- आवाहये ल्लोकमातृर्जयंतीप्रमुखाःशुभाः।
  नानाभीष्टप्रदाः शांता सर्वलोकहिता वहाः ॥ ॐ लोकमातृभ्यो नमः। आ. स्था. पू.।

13. धृतिम्

ॐ यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु।
यस्मान्न ऋते किंचन कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु ॥

- नमःस्तुष्टिकरीं देवीं लोकानुग्रहकर्मणी।
  स्वकामस्यच सिध्यर्थं धृतिमावाहयाम्यहं ॥ ॐ धृत्यै नमः। आ. स्था. पू.।

14. पुष्टिम्

ॐ त्वाष्टा तुरीयो अभ्युत इन्द्राग्नी पुष्टिवर्धना।
द्विपदा धन्दा इन्द्रियमुक्षा गौर्न वयो दधुः ॥

- आवाहयाम्यहं पुष्टि जगद्विघ्न विनाशिनी।
  ज्ञात्वा पुष्टि करिं देवीं रक्षणाया ध्वरे मम ॥ ॐ पुष्ट्यै नमः। आ. स्था. पू.।

15. तुष्टिम्

ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः।
सनः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥

- सौम्यरुपे सुवर्णाभे विद्युज्वलीतकुंडले।
  धर्मतुष्टिकरीं देवीं मस्मिन्यज्ञे हितायवै ॥ ॐ तुष्ट्यै नमः। आ. स्था. पू.।

16. आत्मनः कुलदेवताम्

ॐ प्राणाय स्वाहा अपानाय स्वाहा व्यानाय स्वाहा।
चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा ॥

- त्वमात्मासर्व देवानां देहिनांमंत्र सर्वगां।
  वंशवृध्दि करीं देवीं कुलदेवीं प्रपूजयेत् ॥ ॐ आत्मनः कुलदेवतायै नमः आ. स्था. पू.।

॥ नवग्रह मंण्डल पूजनम् ॥

ब्रह्मा मुरारी त्रिपुरान्तकारी
भानु शशि भूमि-सुतो बुधश्च ।
गुरुश्च शुक्र शनि राहु केतवः
सर्वे ग्रहा शांति करा भवंतु ॥

१. सूर्यम्

मण्डल के मध्य में | लकडी - मदार | फल - द्राक्ष

- **ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च ।**
  हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥
- **जपा कुसुम संकाशं काश्यपेयं महाद्युतिम् ।**
  तमोऽरिं सर्व पापघ्नं प्रणतोऽस्मि दिवाकरम् ॥

ॐ भूर्भुवः स्वः कलिंगदेशोद्भव काश्यपस गोत्र रक्त वर्ण भो सूर्य । इहागच्छ । इहतिष्ठ सूर्याय नमः । सूर्यम् आवाहयामि, स्थापयामि, पूजयामि ।

२. चन्द्रम्

मण्डल के अग्निकोण में | लकडी - पलास | फल - गन्ना

- **ॐ इमं देवाऽअसपत्न ७ सुवध्वं महते क्षत्राय महते ज्यैष्ठयाय महते जानराज्या येन्द्रस्येन्द्रियाय । इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोमी राजा सोमोस्माकं ब्राह्मणाना ७ राजा ॥**
- **दधि शंख तुषाराभं क्षीरोदार्णव संभवम् ।**
  नमामि शशिनं सोम शम्भोर्मुकुटभूषणम् ॥

ॐ भूर्भुवः स्वः यमुनातीरोद्भव आत्रेयस गोत्र शुक्ल वर्ण भो चन्द्र । इहागच्छ । इहतिष्ठ चन्द्रमसे नमः । चन्द्रमसम् आवाहयामि, स्थापयामि, पूजयामि ।

३. भौमम्

मण्डल के दक्षिण में | लकडी - खैर | फल - सोपारी

- **ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्याऽयम् । अपा ७ रेता ७ सि जिन्वति ॥**
- **धरणी गर्भसंभूतं विद्युत्कान्ति समप्रभम् ।**
  कुमारं शक्ति हस्तं च मंगलं प्रणमाम्यहम् ॥

ॐ भूर्भुवः स्वः अवन्तिकापुरोद्भव भरद्वाजस गोत्र रक्त वर्ण भो भौम । इहागच्छ । इहतिष्ठ भौमाय नमः । भौमम् आवाहयामि, स्थापयामि, पूजयामि

४. बुधम् मण्डल के ईशान कोण में लकडी - चिचडी फल - नारंगी

- **ॐ उद्बुध्य स्वाग्ने प्रति जागृहि त्वमिष्टा पूर्ते स ७ सृजेथा मयं च ।**
  अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वेदेवा यजमानश्च सीदत ॥
- **प्रियंगु कलिका श्यामं रुपेण प्रतिमं बुधम् ।**
  सौम्यं सौम्य गुणोपेतं तं बुधं प्रणमाम्यहम् ॥

  ॐ भूर्भुवः स्वः मगधदेशोद्भव आत्रेयस गोत्र हरित वर्ण भो बुध । इहागच्छ । इहतिष्ठ बुधाय नमः । बुधम् आवाहयामि, स्थापयामि, पूजयामि ।

५. बृहस्पतिम् मण्डल के उत्तर में लकडी - पीपल फल - निम्बु

- **ॐ बृहस्पतेऽ अति यदर्यो अर्हाद्युमद् विभाति क्रतुमज्जनेषु ।**
  यद्दीदयच्छवस ऋतप्रजा त तदस्मासु द्रविणं धेहि चित्रम् ॥
- **देवानां च ऋषीणां च गुरुं कांचन सन्निभम् ।**
  बुद्धिभूतं त्रिलोकेशं तन्नमामि बृहस्पतिम् ॥

  ॐ भूर्भुवः स्वः सिन्धुदेशोद्भव अंगिरस गोत्र पीत वर्ण भो बृहस्पते । इहागच्छ । इहतिष्ठ बृहस्पतये नमः । बृहस्मतिम् आवाहयामि, स्थापयामि, पूजयामि ।

६. शुक्रम् मण्डल के पूर्व में लकडी - गूलर फल - बीजोरु

- **ॐ अन्नात् परिस्त्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पयः सोमम्प्रजापतिः ।**
  ऋतेन सत्य मिन्द्रियं विपान ७ शुक्र मन्धस इन्द्रस्येन्द्रिय मिदं पयोऽमृतं मधु ॥
- **हिम कुन्दमृणालाभं दैत्यानां परमं गुरुम् ।**
  सर्वशास्त्र प्रवक्तारं भार्गवं प्रणमाम्यहम् ॥

  ॐ भूर्भुवः स्वः भोजकटदेशोद्भव भार्गवस गोत्र शुक्ल वर्ण भो शुक्र । इहागच्छ । इहतिष्ठ शुक्राय नमः । शुक्रम् आवाहयामि, स्थापयामि, पूजयामि ।

७. शनिम् मण्डल के पश्चिम में लकडी - शमी फल - कमल गट्टा

- **ॐ शन्नो देवी रभिष्टय आपो भवन्तु पीतये । शंय्यो रभि स्त्रवन्तु नः ॥**
- **नीलांजनसमाभासं रविपुत्रं यमाग्रजं ।**
  छाया मार्तण्ड संभूतं तन्नमामि शनैश्चरम् ॥

  ॐ भूर्भुवः स्वः सौराष्ट्र देशोद्भव काश्यपस गोत्र कृष्ण वर्ण भो शनैश्चर । इहागच्छ । इहतिष्ठ शनैश्चराय नमः । शनैश्चरम् आवाहयामि, स्थापयामि, पूजयामि

८. राहुम् मण्डल के नैर्ऋत्य कोण में लकडी - दुब फल - नारियल

- **ॐ कयानश्चित्र ऽ आभुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥**
- **अर्द्धकायं महावीर्यं चन्द्रादित्य विमर्दनम् । सिंहिका गर्भ संभूतं तं राहुं प्रणमाम्यहम् ॥**

ॐ भूर्भुवः स्वः राठिनापुरोद्भव पैठीनस गोत्र कृष्ण वर्ण भो राहो । इहागच्छ । इहतिष्ठ राहवे नमः । राहुम् आवाहयामि, स्थापयामि, पूजयामि ।

९. केतुम् मण्डल के वायव्य कोण में लकडी - कुशा फल - दाडिम

- **ॐ केतुं कृण्वन्न केतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः ॥**
- **पलाश पुष्प संकाशं तारका ग्रह मस्तकम् । रौद्रं रौद्रत्मकं घोरं तं केतु प्रणमाम्यहम् ॥**

ॐ भूर्भुवः स्वः अन्तर्वेदिसमुद्भव जैमिनिस गोत्र कृष्ण वर्ण भो केतु । इहागच्छ । इहतिष्ठ केतवे नमः । केतुम् आवाहयामि, स्थापयामि, पूजयामि ।

❖ महाकाली ध्यानम्

**खड्गं चक्र गदेषु चाप परिघाञ्छूलं भुशुण्डीं शिरः,
शङ्खं सन्दधतीं करैस्त्रिनयनाम् सर्वांग भूषावृताम् ।
नीलाश्मद्युति मास्य पाद दशकां सेवे महाकालिकाम्,
याम स्तौत्स्वपिते हरौ कमलजौ हन्तुं मधुं कैटभम् ॥**

❖ महालक्ष्मी ध्यानम्

**ॐ या सा पद्मासनास्था विपुल कटितटि पद्मपत्रायताक्षी ।
गम्भीरावर्त नाभि स्तनभरनमिता शुभ्र वस्त्रोत्तरीया ॥
या लक्ष्मीः दिव्यरुपैः र्मणिगण खचितैः स्नापिता हेम कुंभैः।
सा नित्यं पद्महस्ता मम वसतु गृहे सर्वमांगल्य युक्ता ॥**

❖ महासरस्वती ध्यानम्

**या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता ।
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ॥
या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैः सदा वन्दिता ।
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥**

❖ **प्राणप्रतिष्ठा**

ॐ मनो जूतिर्जुषता माज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ७ समिमं दधातु। विश्वे देवास सऽइह मादयन्तामोम्प्रतिष्ठ॥

- अस्यै प्राणाः प्रतिष्ठंतु अस्यै प्राणाः क्षरन्तु च। अस्यै देवत्वम् आचार्यै मामहेति च कश्चन॥

❖ **आह्वानम्**

ॐ तां म आवह जात-वेदो, लक्ष्मीमनप-गामिनीम्। यस्यां हिरण्यं विन्देयं, गामश्वं पुरूषानहम्॥

- ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमि ७ सर्व तस्पृत्वाऽ त्यतिष्ठ द्दशाङ्गुलम्॥

❖ **आसनम्**

ॐ अश्वपूर्वां रथ मध्यां, हस्ति नाद प्रबोधिनीम्। श्रियं देवीमुपह्वये, श्रीर्मा देवी जुषताम्॥

- ॐ पुरुषऽएवेदं ७ सर्व य्यद्भूतं यच्च भाव्यम्। उताम् तत्वस्ये शानो यदन्नेना तिरोहति॥

❖ **पाद्यम्**

ॐ कांसोऽस्मि तां हिरण्य-प्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीं। पद्मे स्थितां पद्म-वर्णां तामिहोपह्वये श्रियम्॥

- ॐ एतावानस्य महिमातो ज्यायाँश्च पूरुषः। पादोऽस्य विश्वा भूतानि त्रिपादस्या मृतं दिवि॥

❖ **अर्घ्यम्**

ॐ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देव जुष्टा मुदाराम्। तां पद्म-नेमिं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि॥

- ॐ त्रिपादूर्ध्व उदैत्पुरुषः पादोऽ स्येहा भवत्पुनः। ततो विष्ष्वङ् व्यक्रा मत्सा शना नशनेऽ अभि॥

❖ **आचमनम्**

ॐ आदित्य वर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽक्ष बिल्वः। तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः॥

- ॐ ततो विराड जायत विराजोऽ अधि पूरुषः। स जातोऽ अत्य रिच्यत पश्चाद् भूमिमथो पुरः॥

❖ **स्नानम्**

ॐ मन्दाकिन्या समानीतैः, हेमाम्भोरुह-वासितैः स्नानं कुरुष्व देवेशि, सलिलं च सुगन्धिभिः॥

- ॐ तस्माद्यज्ञात् सर्व हुतः सम्भृतं पृषदाज्यम्। पशूंस्ताँश्चक्रे वायव्या नारण्या ग्राम्याश्च ये॥

❖ **दुग्ध स्नानम्**

**ॐ पय: पृथिव्याम् पयऽओषधीषु पयो दिव्यन्तरिक्षे पयोधा: ।
पयस्वती: प्रदिश: सन्तुमह्यम ॥**

- **कामधेनु समुद्भूतं सर्वेषां जीवनं परम् ।
पावनं यज्ञ हेतुश्च पय: स्नानाय गृहताम् ॥**

❖ **दधि स्नानम्**

**ॐ दधि क्राव्णो अकारिषं जिष्णोरश्वस्य वाजिन: ।
सुरभि नो मुखा करत् प्रण आयु ७ षि तारिषत् ॥**

- **पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ।
दध्यानितं मया देव स्ननार्थं प्रतिगृह्यताम् ॥**

❖ **घृत स्नानम्**

**ॐ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम् वस्य धाम ।
अनुष्वधमा वह मदयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ॥**

- **नवनीत समुत्पन्नं सर्व संतोष कारकम् ।
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ॥**

❖ **मधु स्नानम्**

**ॐ मधु वाता ऋतायते मधु क्षरन्ति सिन्धव: । माद्ध्वीर्न: सन्त्वोषधी: ।
मधु नक्त मुतो षसो मधुमत् पार्थिव ७ रज:। मधु द्यौरस्तुन: पिता ।
मधुमान्नो व्वनस्पतिर् मधुमाँ२ अस्तु सूर्य:। माध्वीर्गावो भवन्तु न: ॥**

- **पुष्प रेणु समुत्पन्नं सुस्वादु मधुरं मधु ।
तेज: पुष्टिकरं दिव्यं स्ननार्थं प्रतिगृह्यताम् ॥**

❖ **शर्करा स्नानम्**

ॐ अपा ७ रसमुद् वयस ७ सूर्ये सन्त: ७ समाहितम । अपा ७ रसस्य यो रसस्तम् वो गृह्णाम्युत्तम मुपयाम गृहीतो सिन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनि रिन्द्राय त्वा जुष्टतमम् ॥

- **इक्षुसार समुद्भूता शर्करा पुष्टि कारिका ।
मलापहारिका दिव्य स्नानार्थं प्रतिगृह्यताम् ॥**

❖ **पंचामृत स्नानम्**

**ॐ पंचनद्य: सरस्वतीमपि यान्ति सस्रोतस:।
सरस्वती तु पंचधा सो देशे भवत्सरित ॥**

- **पयो दधि घृतं मधु चैव च शर्करा मधु संयुतम् ।
पंचामृतं मयानीतं स्नानार्थ प्रतिगृह्यताम् ॥**

❖ **अभिषेकम्**

यहाँ पर श्रीसुक्त के सोलह मंत्रो से अभिषेक किया जाता है। जो निचे दिया हुवा है।

❖ **गन्धोदक स्नानम्**

ॐ अ ७ शुनाते अ ७ शु: पृच्यतां परुषा परु: ।
गन्धस्ते सोममवतु मदाय रसो अच्युत: ॥

- ॐ गन्ध-द्वारां दुराधर्षां, नित्य-पुष्टां करीषिणीम् ।
ईश्वरीं सर्व-भूतानां, तामिहोपह्वये श्रियम् ॥

❖ **शुद्धोदक स्नानम्**

ॐ शुद्धवाल: सर्वशुद्धवालो मणिवालस्यऽ अश्विना:। श्वेत: श्वेताक्षो रुणस्ते रुद्राय पशुपतये कर्णायामा अवलिप्ता रौद्रा नभोरूपा: पार्जन्या: ॥

- शुद्धं यत् सलिलं दिव्यं गंगाजल समं स्मृतम् ।
समर्पितं मया भक्त्या शुद्ध स्नानार्थं प्रतिगृह्यताम् ॥

❖ **वस्त्रम्**

ॐ उपैतु मां देव सख: कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिं वृद्धिं ददातु मे ॥

- सर्वभूषाधिके सौम्ये लोक लज्जा निवारणे।
मयोपपादिते तुभ्यं वाससी प्रतिगृह्यतां ॥

❖ **उपवस्त्रम्**

ॐ सुजातो ज्योतिषा सह शर्म्म वरूथमासदत्स्व: ।
वासोग्ने विश्वरूप ७ संव्ययस्व विभावसो ॥

- उपवस्त्रं प्रयच्छामि देवाय परमात्मने ।
भक्त्या समर्पितं देव प्रसीद परमेश्वर ॥

❖ **यज्ञोपवितम्**

ॐ यज्ञोपवीतं परमं पवित्रं, प्रजापतेर्यत्सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं, यज्ञोपवीतं बलमस्तु तेज: ॥

- ॐ तस्मादश्वाऽ अजायन्त ये के चोभयादत: ।
गावो ह जज्ञिरे तस्मात्तस्मा ज्जाताऽ अजावय: ॥

❖ **गंध / चंदनम्**

ॐ गन्ध-द्वारां दुराधर्षां, नित्य-पुष्टां करीषिणीम् ।
ईश्वरीं सर्व-भूतानां, तामिहोपह्वये श्रियम् ॥

- ॐ त्वां गन्धर्वा अखनँस्त्वां मिन्द्रस्त्वां बृहस्पति : ।
त्वामोषधे सोमो राजा विद्वान् यक्ष्माद् मुच्यत् ॥

❖ **अक्षतम्**

ॐ अक्षन्नमीमदन्त ह्यवप्रियाऽअधुषत ।
अस्तोषत स्वभानवो विप्रा न्नविष्ठया मती योजान् विन्द्रतेहरी ॥

- अक्षताश्च सुरश्रेष्ठ कुंकुमाक्ता : सुशोभिता : ।
मया निवेदिता भक्त्या गृहाण परमेश्वर ॥

❖ **सुगन्ध द्रव्यम्**

ॐ त्रयम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम।
उर्वारुकमिव बन्धनान मृत्योर्मुक्षीय मामृतात॥

- ॐ अ ७ शुनाते अ ७ शु: पृच्यतां परुषा परु:।
गन्धस्ते सोम मवतु मदाय रसोऽ अच्च्युत:॥

❖ **आभुषणम्**

ॐ क्षुत्-पिपासाऽमलाम् ज्येष्ठाम, अलक्ष्मीर्नाशयाम्यहम्।
अभूतिम समृद्धिं च, सर्वान् निर्णुद मे गृहात्॥

- ॐ सौभाग्य सूत्रम वरदे सुवर्ण मणि संयुतम।
कण्ठे बघ्नामि देवेशि सौभाग्यम देहि मे सदा॥

❖ **काजल**

ॐ चक्षुर्भ्याम कज्जलम रम्यम सुभगे शान्ति कारकम।
कर्पूज्योति समुत्पन्नम गृहाण परमेश्वरि॥

❖ **पुष्पम्**

ॐ मन्दार पारिजाताद्या पाटली केतकी तथा।
मरुवा मोगरं चैव गृहाणाशु नमो नमः॥

❖ **पुष्पमालाम्**

ॐ मनसः काममाकूतिं, वाचः सत्यमशीमहि।
पशूनां रूपमन्नस्य, मयि श्रीः श्रयतां यशः॥

- माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो।
मयाहृतानि पुष्पाणि गृह्यन्तां पूजनाय भोः॥

❖ **दुर्वाम्**

ॐ काण्डात काण्डात प्रोहन्ती परुष: परुषस्परि।
एवा नो दूर्वे प्रतनु सहस्रेण शतेन च॥

- तृणकान्त मणि प्रख्य हरित अभि: सुजातिभि:।
दूर्वाभिराभिर्भवतीम पूजयामि महेश्वरि॥

❖ **बिल्वपत्रम्**

ॐ नमो बिल्मिने च कवचिने च नमो व्वर्मिणे च वरूथिने च
नम: श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्यरय चाहनन्यायच॥

- ॐ त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रिधायुधम।
त्रिजन्मपाप संहारमेक बिल्वं शिवार्पणम॥

❖ **सौभाग्य द्रव्यम्**

ॐ अहिरिव भोगै: पर्येति बाहुन् ज्यावा हेतिम् परिबाधमान:।
हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान पुमा ७ सं परिपातु विश्वत:॥

- अबीरं च गुलालं च चोवा चन्दन मेव च।
अबीरेणर्चितो देव अत: शान्ति प्रयच्छमे॥

❖ **हरिद्राचूर्ण**

ॐ हरिद्रा रंचिते देवि ! सुख सौभाग्य दायिनी।
तस्मात त्वाम पूज्याम यत्र सुखम शान्तिम प्रयच्छ में॥

❖ **कुंकुमम्**

ॐ कुंकुमं कामना दिव्यं कामना काम सम्भवम।
कुंकुमेनार्चितो देव गृहाण परमेश्वर॥

❖ **सिन्दूरम्**

ॐ सिन्धोरिव प्राद्ध्वने शूघनासो व्वातप्प्रमियः पतयन्ति यह्वाः।
घृतस्य धाराऽअरुषो नव्वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः॥

- ॐ सिन्दूरं शोभनं रक्तं सौभाग्यं सुखवर्धनम्।
शुभदं कामदं चैव सिन्दूरं प्रतिगृह्यताम्॥

❖ **अंग पूजा** चावल, पुष्प, चंदन लेकर प्रत्येक मंत्र पर बोलते हुए महालक्ष्मी जी के पास छोडें।

१. ॐ चपलायै नमः।	पादौ पूजयामी	७. ॐ कमलवासिन्यै नमः	हस्तौ पूजयामी
२. ॐ चंचलायै नमः।	जानुनी पूजयामी	८. ॐ पद्माननायै नमः	मुखं पूजयामी
३. ॐ कमलायै नमः।	कटिं पूजयामी	९. ॐ कमलपत्राक्ष्यै नमः	नेत्रत्रयं पूजयामी
४. ॐ कात्यायन्यै नमः।	नाभिं पूजयामी	१०. ॐ श्रियै नमः	शिरः पूजयामी
५. ॐ जगन्मात्रे नमः।	जठरं पूजयामी	११. ॐ महालक्ष्म्यै नमः	सर्वांग पूजयाम

६. ॐ विश्ववल्लभायै नमः वक्षः स्थल पूजयामी

❖ **अष्टलक्ष्मी ध्यानम्**

धनं धान्यं धरां धर्मम् कीर्तिर्मायुर्यशः श्रियम्।
पुत्रान् सर्वकामांश्च अष्टलक्ष्मी प्रयच्छ मे॥

- पंकजं देवि संत्यज्य मम वेश्मनि संविश।
यथा सपूत्र भूत्योहं सुखी स्याम् त्वत्प्रसादतः॥

१.	पूर्व	ॐ आद्य लक्ष्म्यै नमः।	५.	पश्चिम	ॐ काम लक्ष्म्यै नमः।
२.	आग्नेय	ॐ विद्या लक्ष्म्यै नमः।	६.	वायव्य	ॐ सत्य लक्ष्म्यै नमः।
३.	दक्षिण	ॐ सौभाग्य लक्ष्म्यै नमः।	७.	उत्तर	ॐ भोग लक्ष्म्यै नमः।
४.	नैर्ऋत्य	ॐ अमृत लक्ष्म्यै नमः।	८.	ईशान	ॐ योग लक्ष्म्यै नमः।

❖ **अष्टसिद्धि ध्यानम्**

ॐ अणिमा महिमा चैव लघिमा गरिमा तथा।
प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्ट सिद्धयः॥

१.	पूर्व	ॐ अणिम्ने नमः।	५.	पश्चिम	ॐ प्राप्त्यै नमः।
२.	आग्नेय	ॐ महिम्ने नमः।	६.	वायव्य	ॐ प्रकाम्यै नमः।
३.	दक्षिण	ॐ गरिम्णे नमः।	७.	उत्तर	ॐ ईशितायै नमः।
४.	नैर्ऋत्य	ॐ लघिम्ने नमः।	८.	ईशान	ॐ वशितायै नमः।

❖ **धुपम्**

ॐ कर्दमेन प्रजा-भूता, मयि सम्भव-कर्दम ।
श्रियं वासय मे कुले, मातरं पद्म-मालिनीम् ॥

- ॐ वनस्पति रसोद्भूतो गन्धाढयो गन्धः उत्तमः ।
आघ्रेयः सर्व देवानां धूपोऽयं प्रतिगृह्यताम् ॥

❖ **दीपम्**

ॐ आपः सृजन्तु स्निग्धानि, चिक्लीत वस मे गृहे ।
नि च देवीं मातरं श्रियं वासय मे कुले ॥

- ॐ अग्निर्ज्योतिः ज्योतिरग्निः स्वाहा सूर्यो ज्योतिः ज्योतिः सूर्यः स्वाहा ।
अग्निर्व्वर्चो ज्योतिर्व्वर्च्चः स्वाहा सूर्य्योव्वर्च्चो ज्योतिर्व्वर्च्चः स्वाहा ।
ज्योतिः सूर्य्यः सूर्य्योज्योतिः स्वाहा ॥

❖ **नैवद्यम्**

ॐ आर्द्रां पुष्करिणीं पुष्टिं, पिंगलां पद्म-मालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं, जातवेदो म आवह ॥

- ॐ नाभ्या आसीदन्तरिक्ष ७ शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ अकल्पयन् ॥
प्राणाय स्वाहा, अपानाय स्वाहा, व्यानाय स्वाहा, उदानाय स्वाहा, समानाय स्वाहा ॥

❖ **ऋतुफलम्**

ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः।
बृहस्पति प्रसूतास्ता नो मुञ्चन्त्व ७ ह सः ॥

- फलेन फलितं सर्वं त्रैलोक्यं सचराचरम् ।
तस्मात् फल प्रदानेन पूर्णाः सन्तु मनोरथाः ॥

❖ **ताम्बूल / पूगीफलम्**

ॐ आर्द्रां यः करिणीं यष्टिं, सुवर्णां हेम-मालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं, जातवेदो ममावह ॥

- ॐ पूगीफलं महद्दिव्यं नागवल्ली दलैर्युतम् ।
एलादिचूर्ण संयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

❖ **दक्षिणा**

ॐ तां म आवह जात-वेदो लक्ष्मीमनप-गामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरूषानहम् ॥

- ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम् ॥

❖ **कपूर आरती**

ॐ आ रात्रि पार्थिव ७ रजः पितुरप्रायि धामभिः ।
दिवः सदा ७ सि बृहती वितिष्ठस आत्वेषं वर्तते तमः ॥

- **इद ७ हविः प्रजननम्मे अस्तु दशवीर ७ सर्वगण ७ स्वस्तये ।**
आत्मसनि प्रजासनि पशुसनि लोक सन्य भयसनिः ।
अग्निः प्रजां बहुलं मे करोत्वन्नं पयो रेतोऽ अस्मासु धत्त ॥
- **अग्निर्देवता वातो देवता, सूर्यो देवता चन्द्रमा देवता,**
वसवो देवता रुद्रा देवता, दित्या देवता मरुतो देवता,
विश्वे देवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ॥
- **कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।**
सदा बसन्तं हृदया रबिन्दे भवं भवानी सहितं नमामि ॥

❖ **प्रदक्षिणा**

ॐ ये तीर्थानि प्रचरन्ति सृका हस्ता निषङ्गिणः ।
तेषा ७ सहस्र योजनेऽ वधन्वा नितन्मसि ॥

❖ **प्रार्थना**

ॐ सुरासुरेन्द्रादिकिरीट मौक्तिकैर्यक्तं सदायत्रव पादपंकजम् ।
परावरंपातुवरं सुमंगलं नमामिभक्त्या तव कामसिद्धये ॥

❖ **अर्पण**

अनेन कृतेन पूजनेन भगवती महालक्ष्मीदेवी प्रीयताम्, न मम ।

॥ श्री महाकाली (दवात) पूजनम् ॥

- स्याही युक्त दवात (स्याही की बोतल) में मौली लपेट कर सिंदूर से स्वस्तिक बना दें एवं महालक्ष्मी जी के सामने रख दें ।
- पंचोपचार या षोडशोपचार पूजन कर दें ।

❖ **ध्यानम्**

ॐ कालिके त्वं जगन्मातर्मसिरुपेण वर्तसे ।
उत्पन्ना त्वं च लोकानां व्यवहारप्रसिद्धये ॥ **ॐ श्री महाकाल्यै नमः ।**

❖ **प्रार्थना**

या कालिका रोगहरा सुवन्द्या भक्तैः समस्तै र्व्यवहारदक्षैः ।
जनैर्जनानां भयहारिणी च सा लोकमाता मम सौख्यदास्तु ॥

॥ श्री महाकाली (लेखनी) पूजनम् ॥

- लेखनी (कलम) में मौली लपेट कर महालक्ष्मी जी के सामने रख दें।
- पंचोपचार या षोडशोपचार पूजन कर दें।

❖ ध्यानम्

ॐ लेखिनी निर्मिता पूर्वम् ब्रह्मणा परमेष्ठिना।
लोकानां च हितार्थाय तस्मात्तां पूजयाम्यहम् ॥ ॐ लेखन्यै नमः।

❖ प्रार्थना

